This Question Paper consists 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 4 मुद्रित पृष्ठाः सन्ति ।

Roll No.
अनुक्रमाङ्कः

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

Code No. 60/S/A
गूढसंख्या

Set
स्तबकः **A**

# BHARATIYA DARSHAN
# भारतीयदर्शनम्
# (247)

**Day and Date of Examination**
**(परीक्षादिवसः दिनाङ्कश्च)** ______________________

**Signature of two Invigilators** 1. ______________________
**(निरीक्षकयोः हस्ताक्षरम्)**
2. ______________________

**सामान्या निर्देशाः :**

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।

2 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।

3 वस्तुनिष्ठप्रश्ननाम् (A), (B), (C), (D) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।

4 समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि ।

5 उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।

6 स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या ।

7 समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि ।

# BHARATIYA DARSHAN
## भारतीयदर्शनम्
## (247)

परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)] [पूर्णाङ्काः (Full Marks) : 100

---

**निर्देशाः :**

**(1)** अस्मिन् प्रश्नपत्रे **[A]** भागे **10**, **[B]** भागे **10**, **[C]** भागे **10**, **[D]** भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

**(2)** प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

---

**[A]** दशानां युक्तं विकल्पं चिनुत । **1×10=10**

(1) चार्वाकाः एकमेव किं प्रमाणं अभ्युपगच्छन्ति ?

(A) प्रत्यक्षम् (B) अनुमानम्

(C) शब्दः (D) उपमानम्

(2) सर्वे प्राणिनः किमिच्छन्ति ?

(A) इष्टम् (B) अनिष्टम्

(C) उभयम् (D) उभयभिन्नम्

(3) योगस्थः कुरु कर्माणीति कुत्र वर्तते ?

(A) भागवते (B) भगवद्गीतायाम्

(C) उद्धवगीतायाम् (D) गुरुगीतायाम्

(4) तात्पर्यनिर्णायकानि लिङ्गानि कति ?

(A) सप्त (B) अष्ट

(C) पञ्च (D) षट्

(5) मायया उपहितं चैतन्यं किम् ?

(A) ईश्वरसाक्षी (B) ईश्वरः

(C) ब्रह्म (D) जीवसाक्षी

(6) बोधगयायां स्वप्रथमोपदेशं कः कृतवान् ?

(A) शङ्कराचार्यः (B) गौतमबुद्धः

(C) व्यासः (D) कणादः

(7) बुद्धः कस्य वृक्षस्य अधः उपविश्य ध्यानं कृतवान् ?

(A) पलाशवृक्षस्य (B) आम्रवृक्षस्य

(C) कल्पवृक्षस्य (D) बोधिवृक्षस्य

(8) कस्य दर्शनस्य आचार्याः तीर्थङ्कराः भवन्ति ?

(A) जैनदर्शनस्य (B) चार्वाकदर्शनस्य

(C) बौद्धदर्शनस्य (D) शङ्करदर्शनस्य

(9) कर्मपुद्गलानां जीवे प्रवेशस्यावरोधः कः ?

(A) आस्रवः (B) संवरः

(C) बन्धः (D) निर्जरः

(10) बौद्धदर्शनस्य प्रचारः कस्यां भाषायामासीत ?

(A) पाली (B) संस्कृतं

(C) कोङ्किणी (D) हिन्दी

**[B]** दशानां यथानिर्देशम् उत्तराणि लिखत । **2×10=20**

(11) चार्वाकमतानुसारं प्रमेयपदार्थाः कति । के च ते । 1+1=2

(12) चक्षुषा घटरूपप्रत्यक्षे कः सन्निकर्षः । श्रोत्रेण शब्दप्रत्यक्षे सन्निकर्षः कः । 1+1=2

(13) वेदान्तशास्त्रस्य अधिकारी कः । वेदान्तशास्त्रस्य विषयः कः । 1+1=2

(14) तत्त्वमसि कस्यामुपनिषदि वर्तते । तत्त्वमसिवाक्योपदेशः कस्मिन्नध्याये कृतः । 1+1=2

(15) कायमलस्यापननं कथं कुर्यात् । मनोमलस्यापनयनं कथं कुर्यात् । 1+1=2

(16) कर्मकाण्डदिशा कर्म कतिविधम् । किम् तत् । 1+1=2

(17) किन्नाम नित्यं कर्म । नित्यकर्मणः किमुदाहरणम् । 1+1=2

(18) न्यायदिशा अनुमानलक्षणं किम् । अनुमितेः लक्षणं किम् । 1+1=2

(19) वेदाः कति । के च ते । 1+1=2

(20) उत्पत्तिविधेः किं लक्षणम् । विनियोगविधेः किं लक्षणम् । 1+1=2

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त । **4×10=40**

(21) मीमांसागतं धर्मलक्षणं किम् । अथवा मीमांसागतां भावनां प्रतिपादयत ।

(22) शमस्य लघु टिप्पणीं लिखत । अथवा दमस्य लघुटिप्पणीं लिखत ।

(23) नित्यानित्यवस्तुविवेकं वर्णयत । अथवा इहामुत्रफलभोगविरागं वर्णयत ।

(24) चार्वाकस्य तत्त्वमीमांसायाः वर्णनं कुरुत । अथवा योगाचारादीनां स्वमतमुपस्थापयत ।

(25) कर्मयोगस्य फलं किमिति लिखत । अथवा सगुणब्रह्मविषयिणीं भक्तिं वर्णयत ।

(26) वैशेषिकाभिमतं अभावपदर्थं विशदयत । अथवा साङ्ख्योक्तप्रकृतिसत्वे प्रमाणचिन्तनं कुरुत ।

(27) वेदस्य पुरुषकल्पनं कथमिति वर्णयत । अथवा शिक्षायाः स्वरूपं वर्णयत ।

(28) मध्वमते जीवस्वरूपं वर्णयत । अथवा मध्वमते मोक्षसाधनं मुक्तिस्वरूपञ्च वर्णयत ।

(29) प्रतिबिम्बवादं विचारयत । अथवा अवच्छेदवादं विचारयत ।

(30) अविद्यास्वरूपं लिखत । अथवा मायास्वरूपं लिखत ।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः । **6×5=30**

(31) स्मृतिप्रस्थानमधिकृत्य प्रबन्धमेकमारचयत । अथवा न्यायप्रस्थानमवलम्ब्य प्रबन्धमेकं लिखत ।

(32) द्वैताद्वैतसिद्धान्तस्य परिचयं कुरुत । अथवा विशिष्टाद्वैतस्य मोक्षोपायविचारं कुरुत ।

(33) कर्मयोगमाधिकृत्य विवेकानन्दस्य विचारम् उल्लिखत । अथवा कर्मोपासनानां मोक्षं प्रति साधनत्वं प्रतिपादयत ।

(34) वेदान्तस्य शमादिषट्मालोचयत । अथवा जीवस्य परिमाणविचारं कुरुत ।

(35) योगोक्तं समाधिस्वरूपं प्रतिपादयत । अथवा योक्तोक्तम् ईश्वरस्वरूपं वर्णयत ।

---